© 2019 IJSRSET | Volume 6 | Issue 6 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099
International Journal of Scientific Research in Science, Engineering and Technology

# डा.बुद्धेश्वरषडङ्गिविरचितस्य मर्त्यवैकुण्ठमहाकाव्यस्य अलङ्कारस्वरूपम्

आचार्य.सि.ललिताराणी

साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः।

**शोधसारांशः**-मर्त्यवैकुण्ठमहाकाव्यमिदम् नानालङ्कारसम्भूषितं विभाति। आधुनिका अपि कवयः प्राचीनसम्प्रदायमनुसृत्य अलङ्कारादीनां सन्निवेशं सम्यक्कारयन्तीत्यत्रेदं प्रमाणभूतं विभाति। प्रत्नधारा काचित् संरक्ष्यमाणां देववाणीसुवासं दिक्षु प्रसारयति। अतः एतादृशकवीनां कृतिषु प्राचीनकवीनां प्रभावः एवं सम्प्रदायप्रवर्तनं चेति एते विषयाः नितरां मनोहराः भवन्तीति निश्चप्रचम्।

**मुख्यशब्दाः**- डा.बुद्धेश्वरषडङ्गः, मर्त्यवैकुण्ठमहाकाव्यम्, अलङ्कारस्वरूपम्।

**1.उपक्रमः**–समकालिकसंस्कृतकाव्यनिर्मातृषु अग्रगण्याः सन्ति आचार्याः राधावल्लभत्रिपाठी, अभिराजेन्द्रमिश्रः, रमाकान्तशुक्लः, रामकरणशर्मा, सत्यव्रतशास्त्री, हरेकृष्णशतपथी, जि.यस्.आर्.कृष्णमूर्तिः, एलुतुच्चन्, शिवाजी उपाध्यायः, श्रीधरभास्करवर्णेकरः, कलानाथषास्त्री, प्रफुल्लचन्द्रमिश्रः, केशवचन्द्रदाशः, एस.वि.नागराजरावः, पूजालालः, डा.कृष्णलालः, इच्छारामद्विवेदी, पद्माशास्त्री, तारापदभट्टाचार्यः, वि.शास्त्री, सत्यदेव चौधुरी, नोदनाथमिश्रः, ओम्प्रकाशठाकुरः, रामकिशोरमिश्रः, जनार्दनहेगेडे, इति एते प्रेरकाः पथप्रदर्शकाश्च संस्कृतकाव्यवैभवस्य नवीनकविवराश्च।

आधुनिककविवराणां मार्गदर्शकः उत्कलीयसारस्वतसाधकः कविवरो बुद्धेश्वरः अनेककाव्यैः संस्कृतसाहित्यस्य कीर्तिध्वजमुड्डीयते। तस्य प्रकाशितेषु ग्रन्थेषु ऋषिबोधं नाटिका, तथापि वन्द्या, महाप्रसादशतकमिति शतककाव्यम् उषासूक्तं छन्दोलङ्कारमञ्जरी इति व्याख्यानग्रन्थद्वयम् कवः वैदुष्यं विकासयति।

विशालेऽस्मिन् संसारे मानवानां सकलप्रयासचतुवर्गप्राप्तिनिमित्तम् एवेति विदुषां विचारः आदिकविवाल्मीकितः प्रारभ्य आधुनिककालस्य युवकवीनां प्रदर्शकः सरस्वत्याः वरपुत्रः डा.बुद्धेश्वरषडङ्गी महाकाव्यपरम्परायां नवीनां धारां प्रवाहयति। महाकवेः प्राचीनपुराणोक्तं श्रीविष्णुचरितम् आधारीकृत्य रचितं तेन मर्त्यवैकुण्ठमहाकाव्यं प्राचीनाधुनिकरचनापरम्परायाः मिलनक्षेत्रमिति वक्तुं शक्यते।

**2.अलङ्कारलक्षणम् –**

अलङ्कारतत्वज्ञः आचार्यो दण्डी काव्यादर्शे अलङ्कारं लक्षयति –

**काव्यशोभकारान् धर्मन् अलङ्कारान् प्रचक्षते।**[i]

मम्मटः अलङ्कारं लक्षयति इत्थम्–

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**

**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।।**[ii]

**3.मर्त्यवैकुण्ठे शब्दालङ्कारसंयोजनम् –**

**3.1.अनुप्रासालङ्कारः –**

अनुप्रासस्य लक्षणं यथा –

**अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्।**

**छेको व्यञ्जनसंघस्य सकृत्साम्यमनेकधा।।**[iii]

अर्थात् यत्र स्वरवैषम्येऽपि व्यञ्जनवर्णानां वारं वारमावृत्तिः तत्र अनुप्रासः। तस्य प्रथमभेदः छेकानुप्रासः तत्र स्यात् यत्र व्यञ्जनानां क्रमशः सकृत् साम्यं भवति। किञ्च स्वरूपतः क्रमशश्च वारं वारं आवृत्तिर्भवति। मर्त्त्यवैकुण्ठमहाकाव्येऽस्य उदाहरणं यथा –

**भूलोकमध्ये भगवाननन्तो रमानिवासं न विलोक्य देवः।**

**शोकाकुलः शोककथामशोकादिभ्यः तरुभ्योऽकथयत्सशोकः।।**[iv]

**श्रुत्वा स्वरं कोकिलकण्ठजातं सस्मार लक्ष्म्याः कलकण्ठनादः।**

**लतागता चञ्चलता च तस्याः नेत्रस्वभावं सकलं जगाद।।**[v]

अत्र प्रशमश्लोके न–श–क व्यञ्जनानां सकृत् क्रमशः आवृत्तिः। द्वितीयश्लोके क–ल–त व्यञ्जनानां स्वरूपतः क्रमतश्च असकृदावृत्तिः। अतः छेकानुप्रासः अलङ्कारः।

**3.2.वृत्यानुप्रासालङ्कारः –**

तल्लक्षणं यथा –

**एकद्विप्रभृतीनां तु व्यञ्जनानां यथा भवेत्।**

**पुनरुक्तिरसौ नाम वृत्यानुप्रासः इष्यते।।**[vi]

**उदारता स्याज्जगति प्रसिद्धः सदारता ते न भवेन्महात्मन्।**

**न्यायं विहायाऽद्य गतो हि यस्माच्छ्रीहीनदुःखं भज देव तस्मात्।।**[vii]

अस्मिन् श्लोके उदारता – सदारता इति पदयोः व्यञ्जनसंघस्य स्वरूपतः क्रमतश्च सकृदावृत्तिः वृत्युनुप्रासं पोषयति।

**3.3.यमकालङ्कारः –** शब्दालङ्कारेष्वन्यतमः अलङ्कारः यमकः। यमकालङ्कारस्य लक्षणं यथा –

**आवृत्तवर्णस्तबकं स्तवकन्दाङ्कुरं कवेः।**

**यमके प्रथमाधुर्यमाधुर्यवचसो विदुः।।**[viii]

साहित्यदर्पणकारो यमकस्य लक्षणं स्पष्टतया निगदति यथा –

**सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।**

**क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते।।**

**3.4.मर्त्त्यवैकुण्ठमहाकाव्ये यमकस्योदाहरणम् –**

**रमा रमेशस्य पुरं विहाय विरामगत्या पृथिवीं ययौ सा।**

**रामो विरामो रमणीरमां मां मारेण दग्धं मनसा विमेने।।**[ix]

अस्मिन् श्लोके रमा – रमेशस्य प्रथमपादे, तथा रामो विरामः इत्यत्र स्वव्यञ्जनानां क्रमशः आवृत्तत्वात् यमकालङ्कारस्य विषयः भवति।

**संसारसाराय जगद्धिताय प्रदाय तापं सुरमा रमा सा।**

**इदं गृहस्थाश्रमधर्यहीनं विचिन्त्य माता सततं शुशोच।।**[x]

अस्मिन् श्लोके सार-सार, रमा इत्यादि स्थले स्वरव्यञ्जनानां क्रमशः आवृतत्वात् यमकालङ्कारः परिलक्ष्यते। प्रथमे पादे प्रथमसारपदस्य निरर्थकत्वं द्वितीयसारपदस्यश्च स्वार्थकत्वम्. द्वितीये उभयोः सार्थकत्वात् प्रथमरमा शब्दस्य देवतानां मातृकल्पा इत्यर्थः, द्वितीयस्य लक्ष्मीः इत्यर्थः।

**3.5.पुनरुक्तवदाभासालङ्कारविवेचनम् –** पुनरुक्तवदाभासालङ्कारमिममुद्दिश्य भरत-भामह-दण्डि-वामन-रुद्रट-अग्निपुराणकारैः न किमपि विमृष्टम्। सर्वप्रथमम् आचार्य उद्भटः पुनरुक्ताभासं लक्षयन्नाह

**पुनरुक्तवदाभासमभिन्नवस्तिववोद्भासिभिन्नरूपपदम्।**

अत्र यद्यपि पुनरुक्तवदाभास इति पदं प्रयुक्तं वर्तते। तथापि टीकाकारः प्रतिहारेन्दुराजो मघुवृत्त्यांसस्पष्टीकरोति वास्तवेन अलङ्कारः पुनरुक्तवदाभास एवेति।

आलोच्य महाकाव्ये तथैव प्रयोगः कृतः कविना यथा –

**श्रीश्रीनिवासेन ददातु लक्ष्मी**

**धनार्तिनृभ्यः हरिनामधृङ्मयः।।**

अत्र श्री-सक्ष्मी-धनेति समानार्थकशब्दानां पुनरावृत्तिः पुनरुक्तवदाभासं पुष्णाति। किञ्च अर्थान्वेषणे भिन्नत्वमेव प्रतीयते।

**4.मर्त्यवैकुण्ठमहाकाव्ये अर्थालङ्काराणां विवेचनम् –** अनवगतविषयः सादृश्येन वस्तुना कथितश्चेत् सम्यक् ज्ञातुं शक्यते। अयमेव सादृश्यमूलकं उपमालङ्कारः। काव्ये अलङ्कारप्रदर्शने एकाग्रता आवश्यकी। एकाग्रतां विना काव्यस्य निर्मितिर्न भवति। निर्मितमपि काव्यं निरलङ्कृतिः भूत्वा न शोभते नाऽऽद्रियते च।

**4.1.मर्त्यवैकुण्ठमहाकाव्ये उपमालङ्कारविवेचनम् –** अर्थालङ्कारेषु उपमायास्तावत् प्रधान्यम्। यतो हि उपमालक्षणं मम्मटेनोक्तं यत्- साधर्म्यमुपमा भेदे।[xi] अर्थात् उपमानोपमेययोः विद्यमानत्वेऽपि भेदे यदि उभयोः समानधर्मः वर्तते तर्हि तत्र उपमालङ्कारस्य प्रसक्तिः। उपमालङ्कारप्रयोगे डा.षडङ्गीमहोदयाः सिद्धाः दृश्यन्ते। महाकविकालिदासस्य उपमाप्रयोगेन प्रभावितोऽयं सहस्रशः उपमाप्रयोगं कृतवान्। दिङ्मात्रमुदाह्रियतो यथा –

**न वेंति को ना वद मर्त्यलोके शिवप्रदां शेषपतेस्सुलीलाम्।**

**गङ्गेव नित्या वृषदायिनीं तां लोकस्य नित्यं कलितापहन्त्रीम्।।**[xii]

अत्र शेषपतिवैकुण्ठविहारी लीला वर्णिताऽस्ति। कविना प्रोक्तं - भगवतलीला सर्वदा ज्ञानदायिका धर्मदायिका कलिकलुषविनाशनी च भवति इति। सा पुण्यगाथा गङ्गेव नीत्या वृषदायिनी कलितापहन्त्री इति उपमालङ्कारे स्पष्टीकृतम्। अत्र गङ्गा उपमानभूता शेषपतेः लीला उपमेयभूता, साधारणधर्मः पापनाशनम्। इव सादृश इति वाचकशब्दः। अतः शब्दीपूर्णोपमा स्यात्।

**4.2.मर्त्यवैकुण्ठमहाकाव्ये अर्थान्तरन्यासलङ्कारविवेचनम् –**

**सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।**

**यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा।।**[xiii]

यत्र स्थले सामान्यं विशेषेण, विशेषः सामान्येन वा समर्थ्यते तत्रार्थान्तरन्यासालङ्कारः। अनेन प्रकरेण द्विविधोऽयं साधर्म्यवैधर्म्यभावेन चतुःप्रकारको भवति। दृष्टान्ते सामान्यं सामान्येन विशेषः विशेषेण समर्थ्यते इह तु तद्वैपरीत्यमिति भेदः। अत्र महाकाव्ये अर्तान्तरन्यासलङ्कारस्य बाहुल्यात् प्रयोगो दृश्यते। यथा –

**हाय्टेक्नामयुतेन्दिरासुकलिताऽर्वाचीनविज्ञैः कृता**

**सर्वालङ्कृतनायिकेव नगरी यक्षाधिपाकांक्षिता।**

**स्वभाग्यं सकलं चिकीर्षितनरैर्वासस्सदा कांक्ष्यते**

**मुग्धानायिकया समं विहरणं को वा नरो नेहते।।**[xiv]

अत्र नरस्य मुग्धानायिकया सह विहरणम् इति सामान्यवचनात् हैद्रावादस्य भ्रमणं सर्वेषां अभीश्चम् इति प्रस्तुतस्य विषयस्य समर्थनात् अर्थान्तरन्यासालङ्कार।

**4.5.अतिशयोक्तिप्रयोग: –**

**निगीर्याध्यवसानं तु प्रकृतस्य परेण यत्।**

**प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम्।**

**कार्य्यकारणयोर्यश्च पौर्वापर्य्यविपर्य्यय:।**

**विज्ञेयातिशोक्ति: सा....।**

इयमतिशयोक्ति: चतुर्धा भवति। यत्र उपमानेन कवलीकृतस्य उपमेयस्य उपपादकं भवति तत्र एक: प्रकार:। यत्र प्रकृतवस्तुन: प्रकारान्तरेणाभिधानं भवति तत्र द्वितीयप्रकार:। यत्र यदि इति शब्देन असम्भविन: अर्थस्य कल्पनं भवति तत्र तृतीय: प्रकार:। यत्र काम्यकार्ययोवैपरीत्यं भवति, अर्थात् आदौ कारणमनुक्त्वा कार्य्यकथनानन्तरं कारण चेत् उच्यते तत्र चतुर्थ: प्रकार: भवति। अस्मिन् महाकाव्ये समायोजिता अतिशयोक्ति:। यथा –

**गोदावरी या सुरलोकवन्द्या**

**गङ्गायते सा सरिदान्ध्रदेशे।**

**जलेन पापं गलतीति तस्या:**

**मत्वाद्रियन्ते मनुजा: सदा ताम्।।**[xv]

इत्यत्र पुण्यतोया गोदावरी सुरलोकवन्द्या, तथा गङ्गा इव पुण्यदायिनीति वर्णनं गोदावर्या: महत्त्वाधिक्यं प्रकाशयति। गङ्गाजलेन यथा पापं याति तथाप्यत्र मनुजानां सदा पापं दूरीकरोति। अतएव उपमानेन कवलीकृतस्य अतिशयोक्ति – उपमेयस्य वर्णनातु अलङ्कारस्य आशय:।

**4.6.मर्त्त्यवैकुण्ठनहाकाव्ये विभावनालङ्कारविवेचनम् –** अत्र धनिकानां सर्वत्र आदर: न तु दरिद्राणामिति साधारणविषय: आन्ध्रदेशीयानां कठोरश्रमै: कनकसंग्रहप्रीतिरूपस्य विशिष्टस्य समर्थनात् अर्थान्तरन्यास:।

**क्रियाया: प्रतिषेधेऽपि फलव्यक्तिर्विभावना** इति।

अर्थात् यत्र क्रियाया: (कारणस्य) प्रतिषेधेऽपि फलव्यक्तिर्भवति, अर्थात् कारणं विना कार्योत्पत्तिकथनं भवति तत्रायमलङ्कार:। यथा –

**विश्वस्य कर्त्ता भगवान् रमेश:**

**शास्त्रीयमार्गावनतत्परोऽयम्।**

**गृहागतानां तिथिहीननृणां**

**सत्कारमार्गं श्रयते न कस्मात्।।**[xvi]

अत्र सकलशास्त्रधारभूतस्य नारायणस्य अतिथिसमर्चने आनादरवर्णनात् विभावनालङ्कार:। यत: अशास्त्रविदां कृते अतिथ्यवमाननं समीचीनं न तु शास्त्रविदामिति परमितार्थ:।

**4.7.मर्त्त्यवैकुण्ठे काव्यलिङ्गालङ्कार: –** यत्र उक्तिविशेषणै: कार्यस्य उपस्थापनं तत्र काव्यलिङ्गमलङ्कार: तल्लक्षणं यथा –

**नुनाव वैकुण्ठपुरं महर्षिः**

**मुक्तामहोभिः परिशोभितं यत्।**

**पर्याप्तभाग्याद्धि जनस्समर्थो**

**वैकुण्ठलोकस्य विलोकनार्थम्।।**[xvii]

इत्यत्र वैकुण्ठलोकस्य पर्याप्तमायञ्च कारणत्वमाह। अतः काव्यलिङ्गम्।

**उपसंहार**:- एवं मर्त्यवैकुण्ठमहाकाव्यमिदम् नानालङ्कारसम्भूषितं विभाति। आधुनिका अपि कवयः प्राचीनसम्प्रदायमनुसृत्य अलङ्कारादीनां सन्निवेशं सम्यक्कारयन्तीत्यत्रेदं प्रमाणभूतं विभाति। प्रत्नधारा काचित् संरक्ष्यमाणां देववाणीसुवासं दिक्षु प्रसारयति। अतः एतादृशकवीनां कृतिषु प्राचीनकवीनां प्रभावः एवं सम्प्रदायप्रवर्तनं चेति एते विषयाः नितरां मनोहराः भवन्तीति निश्चप्रचम्।

उपयुक्तग्रन्थसूची –

1.काव्यादर्श – धर्मेन्द्रकुमार गुप्तः, मेहेरचन्द्र लढमनदास. दिल्ली, 1973

2.साहित्यदर्पणः – शेषराजशमरिग्नि, कृष्णदास अकादेमी, गोपालमन्दिर लेन, वाराणसी,1996.

3.काव्यमीमांसा – रामशङ्करत्रिपाठी, मो.वे.प्र. दिल्ली.

4.काव्यप्रकाशः(मम्मटकृतः) – प.रघुनाथप्रसाद द्विवेदी, चौखम्बा संस्कृत संस्थान, वारणसी, 2003.

5.ईशादि नौ उपनिषद्, शङ्करभाष्यम् – गीताप्रेस्, गोरक्षपुर, 273005, 2000.

6.काव्यालङ्कारः(आचार्य भामः) – डा.रमण कुमार शर्मा, विद्यानिधि प्रकाशन, दिल्ली,2007.

7.शब्दकल्पद्रुमः – अमरपब्लिकेशन्, दिल्ली,2003.

8.मर्त्यवैकुण्ठमहाकाव्यम् – Dr.Buddeswar Sarangi, Benaras Mercantile Company, 125, Mahatma Gandhi Road, Kolkata,700007, 2011

**सन्दर्भसूची**

i. का.द.2.1,पु.433

ii. का.प्र.6.67

iii. सा.द.10.3,पृ.667

iv. म.वै.4.30

v. म.वै.4.31

vi. प्र.रु.शब्दप्रकरणम्,पृ.405

vii. म.वै.3.52

viii. च.आ, 5.8

ix. म.वै.4.1

x. म.वै.4.47

xi. का.प्र, 10/1,पु.361

xii. म.वै,1/4
xiii. का.प्र, 10/101
xiv म.वै., 1/28
xv म.वै,1/11
xvi. म.वै, 3/15
xvii. म.वै. 3/1